श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रामावतारशर्म प्रणीतम्

# ॥ श्री मारुतिशतकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मारुतिशतकम् ॥

## (क) हनूमान्

अव्यादव्याजभव्याकृतिरतनुरयव्याप्तनव्यानुभावः
सव्यासव्याद्रिदिव्यावनिरुहकुसुमार्चाभृदव्याकुलाङ्गः।
क्रव्यादौघाञ्छरव्याण्युपदधदनिशं साधु रव्यात्मजार्थे
हव्याहारव्रजव्याहृतविनुतिरसौ सज्जनानाञ्जनेयः॥ 1 ॥

सुग्रीवे क्लीबजीवे विवलति च नलेप्यङ्गदे भङ्गमाप्ते
ऋक्षेशे क्लेशशेषे स्खलति भयभरान्नीलवक्त्रे च नीले।
रोषावेशादशेषं विकलयति बलं मेघनादे सनादं
प्राप्तः प्राभञ्जनिर्द्राग्विरचयतु विपद्भञ्जनं सज्जनानाम्॥ 2 ॥

रक्षोवक्षोस्थिकक्षक्षपणचणभुजक्षेपिताक्षुद्रवृक्षः
क्षिण्वन्क्षिप्रं समीकक्षितिषु परबलक्षेममक्षय्यपक्षः।
इक्षुक्षामान्विमथ्नन्क्षणमतनुघृणो यक्षराजानुजाक्षान्
क्ष्वेडाविक्षोभितक्ष्मः क्षुपमिव हनुमान्क्षीबतां वः क्षुणत्तात्॥ 3 ॥

अत्रस्नुर्जत्रुयन्त्रं त्रसरमिव बलत्रातसुत्रामशत्रो -
र्मथ्नंस्त्रेतात्रिनेत्रस्त्रुटति निजभराद्दत्तगात्रस्त्रिकूटे।
कुर्वन्पात्रं त्रपायास्त्रिदशरिपुपतिं पक्त्रिमादृष्टतन्त्रं
पुत्रो दुष्कर्मसूत्रं ह्रसयतु मरुतो वस्त्रयीत्राणसत्रः॥ 4 ॥

सार्द्धं सार्द्धं परार्द्धं निर्ऋतिकुलभुवां जानकीशोकजालैः
साकं साकम्परक्षः परिवृढकुतुकै रक्षमक्षय्यवीर्यः।

निष्पिष्योद्यानमालां सह बहलतरैः संज्वरैर्निर्जराणां
लङ्कायां गर्जितं वो विदधदनिलभूरस्तु भव्याय शश्वत् ॥ 5 ॥

स्पर्धागर्धावदर्धावधिविधुतधराधाविधाराधराणा -
मूर्ध्वं वर्धिष्णुगार्ध्रोद्धतगरुदनिलोद्धूतमूर्ध्ना रिपूणाम्।
अद्धा श्रद्धां समृद्धामधिकमधिमृधं धूनयन्गान्धवाहि -
र्बुद्धेर्धर्म्यां विदग्धां धुतविधुरधुरां धोरणीं वो विधेयात् ॥ 6 ॥

अन्वाकृष्टैस्तटान्तात्सपदि रयवशाद्रोमकूपप्रविष्टैः
क्षुन्दन्वक्षांसि रूक्षक्षितिरुहनिकरै रक्षसां निर्गलद्भिः।
पिंषन्पाषाणवर्षैर्गिरिभिरदितिजद्वेषिपाशस्य पस्त्यं
लङ्कोत्सङ्गे पतन्द्राक्प्रभवतु भवतां भूतये पार्षदश्विः ॥ 7 ॥

द्राग्रम्भास्तम्भदम्भैः सह गलितजवोज्जृम्भितैर्यातुडिम्भैः
स्तभ्नन्दम्भोलिकुम्भीनसगरुडभुजं हन्त जम्भारिशत्रुम्।
संरम्भारम्भविष्कम्भितबलजिदवष्टम्भगम्भीरसेना -
कुम्भीरं कुम्भकर्णं हरतु तव कृणन्सम्भ्रमं कीशशम्भुः ॥ 8 ॥

तूर्णं व्याघूर्णितार्णोनिधिनिभपृतनाकर्णधारं विचूर्ण्यो -
दीर्णाङ्गं कुम्भकर्णं रणरणरणकोद्घूर्णसम्पूर्णकर्णम्।
निर्णीयाभ्यर्णमाप्तं बलरिपुजयिनं तर्णकं स्वर्णवर्णः
सङ्कीर्णोन्तर्घृणाभिस्तृणयतु हनुमांस्तेवकीर्णित्वदोषम् ॥ 9 ॥

सर्वापूर्वो वनौका गिरिकलनपटुः प्रेष्ठधात्रीफलोसौ
केसर्यात्मावलीलाविततरुचिरतो राजकोपक्रियास्थः।
वातायुस्थानशाली प्रियसुर उदिताघापहस्तष्यहारी
भक्त्या रूपाणि विष्णोरनुविदधदिवास्त्वाञ्जनेयो विभूत्यै ॥ 10 ॥

भिल्लीधम्मिल्लमल्लीपरिमलिनि दरोत्फुल्लकाम्पिल्लवल्ली -
हल्ली सोल्लासमल्ले मरुति सति सरिल्लोलकल्लोलवेल्ले।
झिल्ली क्षुल्लान् प्रचुल्लाँल्लघुरजनिचराँल्लीलयोल्लोठ्य नर्दन्
लेखानुल्लाघयन्सँल्लघयतु विपदं तल्लजो मर्कटानाम्॥ **11** ॥

स्थेष्ठस्थूणास्थविष्ठोद्धतपरिघभुजान्स्थावरस्थानुसंस्थान्
द्वास्थान्स्थाने विमथ्नन्स्थलमवदलयन्रक्षसां स्थायुकास्थः।
स्थाणुस्थामासुरद्विड्द्युपतिपतिमसौ स्तम्भयन्स्थूललक्ष्य -
स्थाप्याच्छोकाद्यवस्थास्थिरमनिलभवः सुस्थतास्थासकं वः॥ **12** ॥

पृथ्वी पृथ्वी फणे सर्षपति फणभृतः पुण्डरीकत्यथासौ
पाथोधौ सोपि गण्डूषति करजठरे कुम्भयोनेः स्म खेसौ।
खद्योतत्यप्यदः स्म क्षुपति बलिरिपोः षद्पदत्येषदेवो
यद्बिम्बाब्जे करस्थामलकति स पुरा यस्य सोव्यात्कपिर्वः॥ **13** ॥

प्रत्नैर्वाचां प्रपञ्चैरपचितविभवश्चन्द्रचूडावतार -
श्चञ्चच्चञ्चोपचारां रजनिचरचमूं चञ्चलां चूर्णयंस्तात्।
चारूच्चेलाञ्चलाग्रं चपलमचतुरं चालयंश्चालयस्थं
चिन्तासञ्चान्तचित्तं निर्ऋतिकुलपतिं भूतये कीशचन्द्रः॥ **14** ॥

सद्यः खद्योतजालं द्युमणिरिव विनिर्मृद्य शत्रून्समद्यान्
हृद्यामुद्यानमालां रजनिचरपतेर्द्योतवन्द्यो विभिद्य।
माद्यन्विद्याधराद्यैः सरसपरिलसद्गद्यपद्यैरनिन्द्यै -
रुद्यद्वाद्यैर्नुतस्ते दिशतु पवनभूर्बुद्धिमद्यानवद्याम्॥ **15** ॥

यस्मिन्माहेन्द्रशृङ्गादतनुतनुरयेभ्युत्प्लुते मेघमार्गं
वेगाकृष्टः पयोधिः क्षुभिततिमिकुलो राजताद्रिप्रकाशे।
चन्द्रभ्रान्त्याभ्युदञ्चन्निव विबुधवधूसंसदातर्क्युदर्कान्
भद्रान्दिश्यादजस्रं स पवनतनुभूधार्मिकाणां जनानाम्॥ **16** ॥

चक्रीवच्चक्रवालं रथमभिदलयन्नाहवाम्भोधिनक्रः
क्रूरक्रव्यादचक्रक्रथनकृतमतिर्विक्रमाक्रान्तशक्रम्
क्रन्दत्क्रोष्टृक्रमन्द्राक्क्रकचनिभनखः क्रीडया क्रोधवक्रं
रक्षः क्रोडं विमथ्नन्क्रशयतु विपदं कीशसंक्रन्दनस्ते ॥ **17** ॥

हाहा शाखामृगोसौ ज्वलितहुतभुजा दह्यते पुच्छसीम्ने -
त्युच्चैर्यावत्सहासं रजनिचरकुलं नातनिष्ट प्रलापम्।
तावद्दग्ध्वा तदीयैः सह कुतुकभरैः प्राप्तभूयःकलङ्कां
लङ्कां रामं प्रयातः प्रचुरयतु सदा पार्षदश्विः श्रियं वः ॥ **18** ॥

एलागुच्छाच्छकच्छच्छविजलधितटच्छद्मविच्छन्नरूपान्
रक्षोम्लेच्छान्विमूर्च्छ्योच्छलदसृगरुणां पिच्छिलां क्ष्मां वितन्वन्।
स्वच्छन्दं छातवाञ्छञ्छगलमिव कृणन्नक्षमुच्छ्रायिवक्षा -
श्छेयादोघं छलानां नृमनसि विपुलच्छायपुच्छो हनूमान् ॥ **19** ॥

एतेनोन्मथ्य वार्धिं सकलमपहृतं सोदराणां कुलं नो
रत्नानां हा कियन्तो बहलविवलनैश्चूर्णिता बन्धुवर्गाः।
इत्थं द्वेषादिवान्तस्तिमिभिरनुगतो वेगकृष्टैर्ग्रहीतुं
मन्थाद्रिभ्रान्तिभूस्तात्पवनतनुभवो भूतये लङ्घनेब्धेः ॥ **20** ॥

वेल्लद्भिल्लीकुचाग्रप्रणयिभिरनिलैर्मल्लिवल्लीमतल्ली -
हल्लीसोल्लासमल्लैर्वरिवसिततनुः सल्लकीहल्लकोत्थैः।
रामाज्ञासौविदल्लोवतु मधुमदभृत्पिल्लमर्त्यादपल्ली -
कुल्याकल्लोलसँल्लोलनबहलबलोक्षुल्लतेजाः प्लवङ्गः ॥ **21** ॥

यस्मिञ्छैलान्महेन्द्राद्रजनिचरपुरायोत्प्लुतेभ्यन्तरीक्षं
वेगादाकृष्टपूरं क्षणमिव जलधिं वीक्ष्य सर्वे प्लवङ्गाः।
मार्गो दत्तोब्धिनेत्युद्धतमभिदधतस्त्रासिता वाडवेन
श्रेयस्स्रोतांस्यजस्रं प्रदिशतु भवतामञ्जनानन्दनः सः ॥ **22** ॥

दोर्दद्रूद्रिक्तनिद्रान्द्रुहिणमतिमपि द्रुह्यतः सान्द्रगर्वान्
विद्राव्य द्रागभद्रान्नजनिचरपतीन्विश्वकद्रूनिवोग्रान्।
लङ्काद्राक्षाद्रुमाणां ततिमदवलयन्वानरानीकिनीन्द्रो
विष्वद्रीचीं द्रुतं वो द्रुतकनकरुचिर्भद्रमुद्रां प्रदेयात्॥ **23**॥

यस्मिँल्लङ्कामवाप्ते सरिदधिपतिमुल्लङ्घ्य लेभे तयोरु -
र्भङ्गस्तेनाथ रक्षः परिवृढहृदयं तेन भूमिस्तयाथो।
दोषः शेषस्य चैभिः कमठकुलविभुस्तेन भूयान्प्रकम्प -
स्तेन ब्रह्माण्डभाण्डं स भवतु हनुमान्भव्यकर्त्तानिशं वः॥ **24**॥

रक्षिग्राहैरजस्रं ग्रथितमिव महाग्रावदुर्गाभ्युदग्रं
रक्षोग्रामं समग्रं सर इव चपलं शोषयन्ग्रीष्मतेजाः।
सङ्ग्रामे साग्रहो द्राग्रिपुजनितबृहद्विग्रहग्रन्थिमुग्रं
भज्यात्प्रत्यग्रजाग्रद्रुचिरतुलबलो मर्कटग्रामणीर्वः॥ **25**॥

यस्मिन्घोरान्प्रवीरान्विधुवति समरे क्षीणसैन्याकुलत्वा -
ल्लङ्कासङ्क्रन्दनेन क्षुभितमवधृतं स्पर्धितं नर्दितं द्राक्।
भ्रान्तं श्रान्तं प्रशान्तं पुनरवनितलं क्षुण्णमङ्गुष्ठकोट्या
स त्वां श्रीराघवाज्ञाधृतमतिरवतात्सर्वदा पावमानिः॥ **26**॥

प्रत्नैर्वाचां प्रपञ्चैः प्रकटितविभवः प्राकृतान्यप्रभावः
प्राप्तः प्राचेतसाद्यैः प्रचुरसुरवधूसुप्रभातप्रभोसौ।
कम्प्रं प्रत्यर्थिवृक्षप्रकरमवकिरन्पाणिजोग्रक्षुरप्रः
क्षिप्रं प्रत्नः प्लवङ्गः प्रथयतु भवतां प्रेयसां सम्प्रदायम्॥ **27**॥

सङ्ग्रामे यद्भुजाग्राहतविपुलगिरिक्षोभणोत्थैर्मरुद्भिः
सम्पूर्णे पाञ्चजन्ये रसति कमलया भीतयाभ्यर्थि विष्णुः।
दैत्यप्रेतेन शश्वत्कृतनिलयममुं मुञ्च कान्तेति सोयं
भूयाद्भव्याय भूयस्तव सभयजनत्राणभूमा हनूमान्॥ **28**॥

शङ्कासङ्क्रान्तलङ्कापतिहृदयदृषट्टङ्कसङ्काशनिर्य -
दृधुङ्कारः शङ्कराभः सपदि विदलयञ्ज्ञानकीशोकशङ्कुम्।
सङ्कीर्णं कच्छपङ्कं सपदि जलनिधेर्यातुकङ्कालरङ्कैः
कुर्वन्सङ्कल्पजातं कलयतु रुचिरं कीशसङ्क्रन्दनो वः॥ **29** ॥

यस्मिन्नुत्फालमातन्वति बहुलरयाकृष्टनिः क्षिप्तकम्प्र -
क्षोणीनिष्पिष्टपृष्ठश्लथभुजगफणक्षुण्णकूर्माङ्घ्रघातात्।
स्वेदोन्मिश्रैः करोद्यद्वमथुभिरखिलं नाङ्गमासेक्ष्यदाप्स्यन्
मूर्च्छामुच्छ्रायिणीं दिक्करिकुलमवतादाञ्जनेयो जनान्सः॥ **30** ॥

सिन्धुध्वानो मदान्धान्धुतपरुषरसत्सिन्धुरो बन्धुराङ्गान्
रक्षोबन्धून्दिवान्धान्नविरिव रभसादस्तगन्धान्कबन्धान्।
विन्ध्यस्कन्धो विधायोद्धतमधुरविधः सत्यसन्धो जनानां
वन्ध्यं निर्बन्धमन्धुं धयतु जयलसत्कन्धरो गान्धवाहिः॥ **31** ॥

शैलानुन्मूलयन्द्राक् खरनखरकुटीकोटरान्तः प्रविष्टान्
वीक्ष्यैनान्पाणियुग्मं समिदजिरतटे सन्धुनानो गलद्भिः।
पिंषंस्तैर्नैकषेयान्मृतखरतुरगाभ्यन्तरे लीयमानान्
सामीरिर्नः समृद्धां धियमवतु सदा संसृतेः क्लेशजालात्॥ **32** ॥

हिंस्रान्विस्रोग्रसृक्क स्रवदसृगरुणानत्रपान्सृत्वरोस्र -
श्रेणिर्निः श्रेण्युपान्ताश्रयिण उदितयोदस्रयन्बाहुशक्त्या।
स्राग्योसस्रंसदुग्रं सहपुरवरणैर्यातुवर्यस्य गर्वं
श्रेयस्स्रोतस्सहस्रं समुदयतु ततः पार्षदश्वेरजस्रम्॥ **33** ॥

उल्लङ्घ्याम्भोनिधिं द्राग्दशमुखहृदये जानकीशोकवह्निं
कृत्वा पुच्छे स्वकीये विहितमथ मनाक्सम्प्रसार्यास्रपाणाम्।
निर्भस्म्यागारवृन्दं सपदि परतटे रामशोकेन साकं
लाङ्गूलाग्निं विभूत्यै भवतु तव कपिः साधु निर्वापयन्वः॥ **34** ॥

मातङ्गारिः कुरङ्गानिव धुरि दलयन्सङ्गरोद्रिङ्गदङ्गं
त्वङ्गल्लाङ्गूलशृङ्गो रजनिचरकुलं तुङ्गगाङ्गेयपिङ्गः
लङ्काशृङ्गाटकान्तर्भुवि बत विचरञ्जङ्गमाद्रिप्रभाङ्गो
निर्भङ्गं मङ्गलानां प्लवगपतिचमूपुङ्गवोव्यात्तरङ्गम् ॥ **35** ॥

अम्भोधिं लङ्घमानोहहह कथमयं मन्दरो नः स बन्धुः
सिन्धुं संयाति नूनं पुनरशनिभयं नः समुद्रादुपेतम्।
शैलैस्त्रस्तैरिवेत्थं विपुलतनुरयाकृष्टिनिघ्नैरुदग्रै -
र्लोलैरन्वीयमानः प्रभवतु भवतो भूतये पार्षदश्विः ॥ **36** ॥

नन्दद्वन्दारुवृन्दारकशिरसिरुहेन्दिन्दिरोच्चन्दिताङ्घ्रि -
स्कन्दामन्दातिसान्द्रोदितभुजविभवो भक्तवृन्देन्दिरेन्दुः
कुर्वन्द्राक्कान्दिशीकान्प्रधनभुवि यथैवोन्दुरुन्दन्दशूको
यातून्देयादतन्द्रं द्रुतमतुलसुखं सोञ्जनानन्दनो वः ॥ **37** ॥

आयातो मन्दरः किं स खलु जलधिना त्रासितः पूर्वमेव
मेरुः किं सोपि सार्धं किल निजविभुना वेत्ति मां शक्रजिष्णुम्।
कैलासः किं स जानात्यहह सह गणै रावणास्यात्मजं मा -
मित्युद्भूतप्रतर्कं दशवदनभुवा वीक्षितोव्याद्धनूमान् ॥ **38** ॥

तुल्यो जाम्बूनदाद्रेरधिमृधमधिकं शाम्बरीचुम्बिरक्षः
शाम्बूकाडम्बरं द्राक्चरणरयवशात्त्र्यम्बकौजा विलुम्पन्।
कीशस्तम्बेरमस्ते बहुवृजिनकुलोल्लम्बजम्बालजालं
हैरम्बैर्विघ्नवृन्दैः सह विदलयताच्छम्बदेहोविलम्बम् ॥ **39** ॥

लङ्कां दग्ध्वा निवृत्तः पथि रभसवशात्पुच्छलग्नेन्दुबिम्ब -
श्छत्रं लङ्केश्वरस्याहरति रघुपतेः पादयोः किं प्रदातुम्।
इत्याश्चर्येण दृष्टः सकलकपिकुलैः स्थेयसां श्रेयसां वः
सन्तानानन्तरायक्षपणचणगुणः पार्षदश्विः प्रदिश्यात् ॥ **40** ॥

यावत्काष्ठाकटाहोल्लुठदधिकरयध्वानधारां स्वमुष्टिं
रक्षश्चक्रेरिताक्षं क्षपयितुमुदितामक्षमक्षय्यशक्तिः
चक्रेपाङ्गप्रपातक्षितिमतनुजवाद्गर्जितादेव ताव -
द्वीक्ष्यैनं यातजीवं कपिरवतु शुभं लज्जितः सज्जनानाम्॥ **41** ॥

अस्मन्नाथः पतन्मा स्म भुजरयवशादस्य भीताभिरित्थं
ताराभिर्भासमानौषधिनिचयमिषादुन्मिषन्तीभिरन्ते।
भेजे यो द्रोणशैलोद्धतविपुलकरः स प्रतापाम्बुराशि -
र्भूयाद्भव्याय भूयः कपिनिकरपतिर्भास्वरायाश्रितानाम्॥ **42** ॥

पृथ्वी स्थैर्यं न धत्तेहह गिरिगुरवो वेपथुं संश्रयन्ते
वृन्दं चैतद्ग्रहाणां सरभसमवनौ भ्रंशते चेष्टितैर्मे।
आलोच्येत्थं दयार्द्रा रजनिचरपतीन्हुङ्कृतैरेव मन्दै -
र्निर्यज्जीवान्वितन्वन्प्लवगपरिवृढो वाढमव्याच्छिवं वः॥ **43** ॥

मत्वा सञ्जातमात्रः समुदितमरुणं मण्डलं चण्डरश्मे -
रेकाग्रं पादपाग्रे गगनतलमभिप्रोत्पतन्नुग्रवीर्यः
वेगादाकृष्यमाणां भुवमवकलयन्द्रागधः पादलग्नां
विस्मेराक्षः कपीन्द्रो निखिलसुखचयं धुक्षयत्वक्षयं वः॥ **44** ॥

कायो यस्यामृतौघो मरुदपि च रयश्चित्रभानुः प्रतापो -
नन्ता लाङ्गूलवल्ली यश उडुरमणो मानसं चान्तरीक्षम्।
प्राप्तेष्टिः कीर्तिगीतिस्तरणिरिह भवे पादपाथोजयुग्मं
सोव्यादष्टाभिरेत्याश्रित इव तनुभिः शम्भुरूपः कपिर्वः॥ **45** ॥

शान्तस्वान्तः समन्तादुरुरुचिविसरातान्तकुन्तालिकान्तं
कृन्तन्कार्त्तान्ततन्त्रप्रणयकृतिकुलं सप्ततन्त्वन्तकानाम्।
हन्तानन्तप्रभावो दलितकलिमलः कीशदन्तावलेन्द्र -
श्चिन्तासन्तानहन्ता न विगणयतु वः सन्ततान्मन्तुतन्तून्॥ **46** ॥

यद्धीत्या ध्यानदम्भाद्विधिरपि सततं शिश्रिये हा निमीलां
विष्णुः कन्यां निधत्ते हृदि सलिलनिधेर्यच्छरैरर्दिताङ्गः।
भस्मीकृत्यापि शम्भुर्यमुदयदरतिस्त्रीमयार्द्धः प्रजात -
स्तं मेने यस्तृणाय स्फुरतु कपिरसौ ब्रह्मचारी श्रिये वः॥ **47** ॥

कृत्वास्मास्वेव वासं बहुसमयमये कुत्र यासीति वृक्षै -
स्तारोद्यत्पत्त्रिकूजाबहलकलकलव्याजतो व्याहरद्भिः।
वेगव्याकर्षनिघ्नैः सरयमनुगतो लङ्घमानोम्बुराशिं
देयाद्वो देवधामा प्लवगपरिवृढो वाढमक्षय्यसौख्यम्॥ **48** ॥

तिग्मोस्रोद्योतिधाम्नाममृतरुचिरलं भूमनोदोहदास्यः
कौरङ्गाङ्की रमेशाग्रजगुरुरसुरक्षामतारिक्तभावः।
मैत्रीरम्याब्जरक्तोद्धचिनयनयुगः स्वर्द्रुहां यः शिखी च
प्राप्तो भावं ग्रहाणां स भवतु भवतां भूतये पावमानिः॥ **49** ॥

हा मातस्तात हा हा प्रिय ह ह दयिते वत्स हा क्वासि यातो
हा दग्धो हा मृतोस्मि स्फुटति बत शिरो हन्त दैवं नृशंसम्।
इत्थं कोलाहलैर्यो रजनिचरपुरीं सम्भृतां दाहकाले
चक्रे सोयं कपिर्वः प्रदिशतु सततं सन्ततं सौख्यराशिम्॥ **50** ॥

आस्फोट्य प्रागुदग्रं भुजयुगमवनौ बालहस्तं विलठ्य
स्फारास्फालस्फुरत्स्वस्यदविधुतमहाभूरुहोग्रोरुदण्डः।
चण्डश्चण्डांशुदीव्यन्मुखरुचिरतुलः सानुदेशात्प्रदिश्यान्
माहेन्द्रादुत्प्लुतो वः प्लवगपरिवृढः प्लोषणं विप्लवानाम्॥ **51** ॥

पादाङ्गुष्ठेन पूर्वं तदनु सरभसं दक्षिणान्येन दोष्णा
क्रान्तं क्रोधान्ततश्च स्फुटमणिमहसा पाणियुग्मेन पुच्छम्।
निष्कम्पं वीक्ष्य भीमः स्तवमतनुबलो यस्य कर्त्तुं प्रवृत्तो
भूयात्त्रैलोक्यबन्धुः प्लवगपरिवृढः सोनिशं वो विभूत्यै॥ **52** ॥

घोणाघोरान्घनाभान्घनकरटिघटाघस्मरान्घोटघोषान्
रक्षोव्याघ्रान्घृणार्द्रो घटितघुणनिभान्पूर्णयित्वैव शीघ्रम्।
जङ्गादघ्नासृगोधान्परिघसमभुजान्द्राग्जघन्याञ्जिघांसु -
र्द्राघिष्ठं विघ्ननिघ्नं लघयतु लघु वः साध्वसं गान्धवाहिः॥ **53** ॥

प्रालेयांशुर्दिनेसौ विकसितकिरणो मूर्द्धहीनो नु शेष -
स्तस्योपर्येष तस्याप्युपरि सुरगिरिस्तस्य चाप्यञ्जनाद्रिः।
इत्थं दृष्टः सतर्कं सकुतुकहृदयं मुग्धसिद्धाङ्गनाभि -
र्लङ्कादाहे कपीनां पतिरवतु सतां शर्मणां सम्प्रदायम्॥ **54** ॥

नोमायास्थानभूतः शिव इव न बलक्षेपणो वृत्रहेव
न प्राप स्मारकेलीरमण इव सरस्वत्सुतायाः कदाचित्।
नो जाड्यव्याप्तकान्ती रजनिकर इव स्तूयते निर्जरैर्यः
सन्देयात्सर्वदासौ कपिनिकरपतिर्भूयसीः सम्पदो वः॥ **55** ॥

वीक्ष्योद्वोढुं समर्थं निजभरमतुलं पुच्छमारूढमारा -
द्वोलोकं दर्शयन्द्राक्कनकगिरिमिव प्रीतिमांस्तातवासात्।
लङ्कादाहे समग्रं गगनतलमभिव्याप्नुवानं ज्वलन्तं
लाङ्गूलेनाग्निकूटं दधदवतु सदा पार्षदश्विः श्रियं वः॥ **56** ॥

अस्तोकास्तब्धबस्तद्युतिरजनिचरस्तोमवैहस्त्यनिष्ठः
पौलस्त्यं पस्त्यमस्तोद्धतजनकुतुकं स्तब्धरोमेव मुस्ताम्।
शक्रस्तम्बेरमाङ्गस्तनितशतधुतप्रस्तरस्तम्बमस्य -
न्नव्यस्तं स्वस्तिवास्तं प्रदिशतु कपिराड् विस्तरं शास्त्रजं वः॥ **57** ॥

यस्मिन्सङ्ग्रामसीन प्रचुरगिरिकुलोन्मूलनव्यग्रपाणौ
मन्ये गौरीगुरुर्यद्भयरभसवशादुल्बणं जाड्यमापत्।
तेनैवायं जडाद्रिः प्रथित इह तथाभूत एवाद्य याव -
च्चास्ते भूयात्स भूत्यै तव पवनसुतो हायनानां परार्द्धम्॥ **58** ॥

कस्त्वं रामाश्रितोहं तव किमिति वधूवश्यता नाक्षशत्रुः
    किं पङ्को नास्त्रपारिर्भवति किल पयोदोहनायैव पारिः।
नैवं त्वत्काननारिः कथमिव परशुः सत्यमाः सन्ततेस्ते
    भूयादेवं दशास्यं वचसि शिथिलयन्भूतये वः कपीन्द्रः॥ **59** ॥

शम्भुर्योगीश्वरैर्यः प्रभुरिति कपिभिः काल इत्यस्त्रपौघैः
    सीतादेव्या च शोकापनुद इति निधिः श्रेयसामित्यदभ्भैः।
अस्मादृक्षैर्विमुग्धैर्वरद इति परं तत्त्वविद्यासु कुण्ठै -
    र्विज्ञातो यः स भूयात्कपिकुलपृतनानायको भूतये वः॥ **60** ॥

पाषण्डाकाण्डकण्डूद्धतभुजविलसन्मण्डलाग्रप्रकाण्डान्
    मण्डूकान्कुण्डलीव क्षणमरिनिकरान्खण्डयंश्चण्डतुण्डः।
गण्डण्डिण्डीरपाण्डुं विदधदतिभयाद्रक्षसां सङ्ख्यशौण्डो -
    खण्डं हृत्पुण्डरीके वसतु कपिचमूमण्डलाखण्डलो वः॥ **61** ॥

गन्धस्तम्बेरमेन्द्रः कमलकुलमिव स्तब्धरोमेव मुस्ता -
    स्तम्बं रिङ्गत्कुरङ्गार्भकसमजमिवोद्दण्डशार्दूलवर्यः।
मथ्नन्नात्रिञ्चरौघं निलयमुपगतं मङ्क्षुमन्दोदरीयं
    पङ्क्त्यास्यं कम्पयन्द्राग्रसितशतकृती भूतये स्तात्कपिर्वः॥ **62** ॥

चञ्चद्रात्रिञ्चरेन्द्राञ्चितसविधधरे काञ्चनाभ्युच्चमञ्चे
    सञ्चान्तं चिन्तयाकुञ्चितमनिलसुतो रावणं वीक्षमाणः।
किञ्चिच्चञ्चूर्यमाणं शिशुमिव सघृणं वञ्चकं पञ्चवक्त्रः -
    क्लेशं चित्ताञ्चले स्यत्वरिकुलगिरिकाकञ्चुकी सञ्चितं वः॥ **63** ॥

उग्रः शश्वत्सुधर्माश्रयणकृतमतिर्यः शुचिर्धर्मराजः
    क्रव्यादोघापहारी मरुदवनपरः सन्निधेर्वित्तदाता।
आशापालः सतां स प्लवगकुलपतिर्भावुकं स्थायुकं वो
    विघ्नानुन्मूल्य सर्वान्धुतकलिकलुषः सर्वदा सम्प्रदेयात्॥ **64** ॥

किञ्जल्कैरञ्जसाङ्घ्रेर्भवजलधिमिमं शोषयञ्जातु जन्तू -
ञ्जीवञ्जीवानिवेन्दुः शरणमुपगताञ्जीवयञ्जैत्रतेजाः।
मञ्जिष्ठामञ्जुनेत्रः शुभकनकरजःपुञ्जसम्पिञ्जराङ्गो
हृत्कुञ्जे मञ्जुले तेस्त्रपकुलनलिनीकुञ्जरोस्त्वाञ्जनेयः॥ **65**॥

दृष्ट्वा जम्भारिशत्रुं प्रमुदितमनसो निःसरत्यट्टहासे
यस्यास्यान्नागराजैः सपदि मुकुलितं वेपितं दिक्करीन्द्रैः।
उड्डीनं शैलवर्यैर्झटिति विघटितं निद्रया कैटभारेः
सोव्याद्वः क्लेशजालाद्भवदुरितभवान्मातरिश्वाङ्गजन्मा॥ **66**॥

श्रुत्वा यस्यागमं द्रागजनिचरपतिः स्नानसक्तः पराञ्च -
न्नग्नोर्धावेष्टिताधोरसनविगलनात्प्रस्खलन्पङ्कलिप्तः।
वस्त्रान्ताच्छन्नवक्त्रास्फुटहसितमवालोकि मन्दोदरीयं
वेश्मान्विष्यन्सुरीभिः स भवतु भवतां भूतये पावमानिः॥ **67**॥

सोढुं यस्य प्रतापं रजनिचरकुलं न क्षमं संयुगाग्रे
किञ्चित्तत्साम्यभाजं गगनतलमणिं निर्भिनत्ति स्म रोषात्।
स प्रत्यूहं निरस्यन्प्रतिपदमतुलः सप्तलोकैकबन्धु -
र्भूयाद्भूत्यै कपीन्द्रः पवनतनुभवः सर्वदा मानवानाम्॥ **68**॥

अश्रान्तभ्रान्तबाहुव्यतिकरदलितादभ्रविभ्राजदभ्रो
भ्रूभङ्गभ्रंशितांहस्ततिरतिकुतुकादुत्कटैरट्टहासैः
काष्ठान्तानष्ट शुभ्रान्विदधतिमनसोविभ्रमो भ्रान्तिशून्यः
कश्चिच्छम्भुस्वरूपो ह्रसयतु सततं सभ्रमं मर्कटो वः॥ **69**॥

सङ्ग्रामे यस्य तैक्ष्ण्यं रतिरपि भगवत्पादपाथोजरेणौ
वक्रत्वं बालहस्ते नयनजलजयो रक्तभावस्तथास्ते।
प्रत्यूहध्वंसवित्तप्रचुरगुणचयो मातरिश्वाङ्गजन्मा
भूयाद्भव्याय शाखामृगनिकरपतिः सज्जनानां स शश्वत्॥ **70**॥

श्रीरामाङ्घ्र्यब्जभृङ्गः सुररिपुवनिताकौमुदीचण्डधामा
सर्वप्रत्यूहशैलाशनिरतुलमृधारण्यपञ्चाननो यः।
श्रीसीताशोकजालोर्जितजलधिमहावाडवः पादपद्म -
प्राप्तानां शेवधिः स प्रभवतु कपिराड् भूतये सर्वदा वः॥ **71** ॥

विष्णुः कौशेयमित्युच्चलति निवसितुं मेरुरित्यादितेया
आरोहन्त्यग्निरित्युद्द्रवति कुलमहो पक्षिणां यं समीक्ष्य।
सोयं जात्यप्रभूतद्रुतकनकनिभः पावमानेरजस्रं
भासामाशान्तगन्ता वितरतु भवते राशिराशीर्विलासान्॥ **72** ॥

शेषेन्द्वम्भोरुहाणां हरिहरविधिभिः संस्तुतो धूतिभीत्या
सामीरेस्तीर्णवार्धेरतिविकटसटास्फोटनोत्थः समृद्धः।
रक्षोनान्दीषु वन्दीकृतविबुधवधूपाणिभिर्वादितानां
झञ्झावातो धुनीताद्दुरितमधरयञ्झाङ्कृतीर्झर्झराणाम्॥ **73** ॥

शक्रे वक्रेरिताङ्गे मरुति रुतिभृति प्राप्तनिद्रे च चन्द्रे
लोकेशे व्यस्तवेषे निभृतभयभरोदस्रयोर्दस्रयोश्च
पक्वाम्रभ्रान्तिभाजो गगनचरपतेर्मण्डले कोप्यपूर्वः
पायाच्छश्वत्क्रमस्त्वां भयवलदरुणे पावमानेर्विमाने॥ **74** ॥

वज्रामास प्रभेदे तडतडिति जवाद्रक्षसां वक्षसां यो
यद्ध्वानः कौम्भकर्णीं सपदि विघटयामास निद्रामभद्राम्।
विद्राव्य द्रागनीकं कुलिशकठिनयोः स्कन्धयोः शक्रजेतु -
र्योपप्तत्सप्तलोकानवतु हनुमतो मुष्टिघातः स शश्वत्॥ **75** ॥

सञ्चूर्णीकृत्य चक्राण्यतनुखरखुरान्खण्डयित्वा खरांश्च
क्षिप्त्वा क्षिप्रं क्षुरप्रं रजनिचरपतेर्धुन्वतो द्राग्ध्वजान्तम्।
क्रुद्धस्याध्याहवाग्रं पवनतनुभुवस्तारविस्फारितोद्य -
त्स्फोटः कूटः सटानां विघटयतु घटामुत्कटानामघानाम्॥ **76** ॥

व्याक्षिप्तव्योमयानं धरणिविवलनक्षोभिताम्भोधिवृन्दं
धूतादित्याश्वधैर्यं घटितविघटितक्षोणिभृत्सन्धिबन्धम्।
जम्भारिस्तम्भदायि प्रकटितविकटप्रेक्षिताक्षं क्षणेन
क्षिप्यादक्षेममक्षाग्रजभुजदमनं गान्धवाहेस्तरस्ते॥ **77** ॥

जङ्घालौजस्विजम्भारिजिदजितशरव्रातपातोर्जितोद्य -
ज्ज्वालाजालोज्ज्वलान्ते समिदजिरतटे दत्तजन्तुज्वरार्त्तौ।
स्वर्जायाजीवजिह्वार्जितजयवचनोर्जस्विसज्जेतृजाते
प्राज्यं मोदं प्रजानां प्रजनयतु जवेनाञ्जनेयस्य जन्यम्॥ **78** ॥

क्षोदिष्ठापष्ठुकाष्ठाजठरहठलुठत्पिष्टदुष्टेभपृष्ठा -
स्फोटध्वानोपकण्ठे शमनमठरुचौ युद्धगोष्ठीप्रकोष्ठे
काष्ठीलास्तम्भकुष्ठं रजनिचरपतेर्निष्ठुरा कण्ठनालं
निष्ठ्यूतासृग्विमथ्नत्यवतु तव शुभं मर्कटप्रष्ठमुष्टिः॥ **79** ॥

स्तादिष्टायाष्टकाष्ठाकरटिघनघटाश्रोत्रसङ्घट्टचण्डः
पारावारस्य पूरे परिगतगुणनो मान्दरान्कन्दरान्तान्।
सम्पूर्य द्रागुदग्रां रजनिचरचमूं ध्वंसयन्साध्वसाब्धौ
प्रध्वानो गन्धवाहाङ्गजभुजयुगभूर्भूयसे सज्जनानाम्॥ **80** ॥

रिष्टिव्याघट्टवित्रोटितविकटरटत्कङ्कटाटद्धटौघे
संस्फोटे शैलपिष्टोत्कटकरटिघटाकोटिसङ्घट्टचण्डे।
रक्षःकुट्टाकमुष्टेर्जरठभवमहाशीविषोद्दण्डदंष्ट्रा -
दष्टानां कष्टजातं विघटयतु सटा मर्कटाखण्डलस्य॥ **81** ॥

## (ख) गर्जितम्

शश्वद्विश्वस्य मुष्णन्त्वतिशयिविसरं शेमुषीकल्मषं द्रा -
ग्गर्जा हर्यादिदेवैरतिरभसनुता गन्धवाहात्मजस्य।

यासु प्राप्तास्वपास्तप्रलयघनरवास्वन्तरं भूतलस्य
स्तौति प्रोद्यन्निमीलो भुजगपरिवृढः श्रोत्रनेत्राद्वयत्वम् ॥ **82** ॥

यासामाशान्तगानां न भवति जलधिर्मानसीग्रेस्तपारो
यासां वासाय पूर्णं ध्रुवमतुलमिदं ब्रह्ममण्डं न भाण्डम् ।
युष्माकं निर्विकल्पं प्रददतु सततं भावुकं स्थायुकं ता
गर्जाः पर्याप्तमर्याद्युदितभयधुतावुद्धुराः पावमानेः ॥ **83** ॥

भानोः सप्तापि सप्तीन्सपदि तरलयत्कन्दरामन्दिराणि
व्याप्तं सप्ताचलानां जलमवदलयत्सप्तपाथोनिधीनाम् ।
सप्तद्वीपस्थजन्तुश्रवणतटमटत्सप्तवर्गात्ममूर्तेः
सूनोर्दिश्यादजस्रं बहुलतरविपद्वर्जनं गर्जनं वः ॥ **84** ॥

लोकस्य क्षेममेकं द्वितयमपि जगत्खण्डयोर्व्यश्नुवानं
नेत्राणि त्रीणि शम्भोर्व्यथयदथ नुतं किञ्च वेदैश्चतुर्भिः ।
पञ्चास्यांस्त्रासयद्राक् षडपि शरजनेराननान्युत्कयत्स्ता -
द्भूत्यै सङ्ख्यादरिद्रान्विकलयदहितान्मारुतेर्गर्जितं वः ॥ **85** ॥

यस्मिन्ब्रह्माण्डमाक्रामति भयरभसस्त्रस्तगात्रः स्खलन्द्रा -
क्छक्रः सिंहासनाग्रात्प्रियमतनु चरैः श्रावितः स्तब्धगात्रः ।
आनन्दान्न न्यपप्तद्दलयतु भवतां दग्धलङ्कस्य पङ्का -
ञ्छङ्काशून्यान्तरस्यानिलतनुजनुषोभ्यूर्जितं गर्जितं वः ॥ **86** ॥

खर्जूदुर्जातबाहूञ्जगदुदितबहुस्फूर्जथुन्निर्जरारीन्
सन्तर्ज्य प्राज्यराजद्विजरुतविलसत्सर्जखर्जूरभूर्जम् ।
पर्जन्यस्याश्रितानां दशवदनवनं मृद्नतः पार्षदश्चे -
र्गर्जाभ्यूर्जस्वलं वो ग्लपयतु सुमनोवर्जितं दुर्जनत्वम् ॥ **87** ॥

यस्मिन्नुद्याति तारापथमतनुभयो ध्यानमध्यास्त वेधाः
स्थाणुः स्थाणुत्वमागाच्चलितफणितनोरच्युतो न च्युतोभूत्।
सर्वान्धर्मान्तरायांस्त्वरितमधरयद्गन्धवाहेः समिद्धां
श्रद्धां धर्माध्वनीनां प्रदिशतु भवतामूर्जितं गर्जितं तत्॥ **88** ॥

धाराधारानुदारान्सपदि तरलयत्स्फारबाणारवाणा -
मच्छामच्छातभूम्नां रुचिमवदलयद्दानवानां नवानाम्।
सत्रासत्राणसत्रं रसितमनिलजस्यास्त्वमानावमाना -
न्नागानागामुकार्त्तीन्विदधदशिवदं वक्रमायक्रमाय॥ **89** ॥

## (ग) लाङ्गूलतदास्फोटौ

हारं हारं गणानां विवुधपरिषदां किञ्च गाङ्गं तरङ्गं
तुङ्गं शीताद्रिशृङ्गं तुरगमुखवधूसंसदां दर्शयत्स्तात्।
माहेन्द्रादुत्पतिष्णोः सितमणिशिखरान्मारुतेश्चारुतेजो
लाङ्गूलं क्लेशकूलङ्कषमतनु सदा साधु लोकस्य सिद्ध्यै॥ **90** ॥

माहेन्द्रे सानुभागे हरितमणिरुचीपत्रजालावृतान्तं
पार्श्वव्यावर्त्तमाने द्युमणिशशिफले विभ्रदभ्रान्तवृत्तेः।
आरात्तारासहस्रप्रचुरसुमकिरं मारुतेर्वृक्षतुल्यं
पुच्छं गुच्छं ग्रहाणां क्षिपदखिलसुखं धुक्षयत्वक्षयं वः॥ **91** ॥

मूले मेरोर्मयूखैर्दिवसकरकरव्रातपातैश्च मध्ये
कोटौ वैरिञ्चपङ्केरुहरुचिनिचयैः पाटलापिङ्गलाभम्।
कुर्वत्संवर्त्तकालज्वलदनलशिखाविभ्रमं वायुसूनो -
र्व्योम्नि द्रोणाचलार्थं द्रुतगमनभृतः पुच्छमास्तां विभूत्यै॥ **92** ॥

विद्योतैः स्फाटिकाद्रेः क्वचिदतिधवलं क्वापि सूर्यस्य भाभिः
पिङ्गं श्यामं क्वचिच्छ्रीरमणरुचिचयैश्चञ्चरीकप्रकाशैः।

यस्मिन्नाकाशमाक्रामति सुरझरणिब्रह्मजासूर्यजानां
सङ्भ्रान्तिः सुराणां भवति तदवतादाञ्जनेयस्य पुच्छम् ॥ 93 ॥

भ्राजिष्णु भ्राम्यदभ्रभ्रमरभरभृतादभ्रभद्रप्रभं द्राक्
स्वः सुभ्रूसुप्रभातं भणदिव बहुलैर्विभ्रमैर्भस्मशुभ्रम्।
भूयो भूयो भ्रमीभिर्भ्रमयदुडुगणं बभ्रुरोमोद्धताभं
भ्राष्ट्रे भ्रातृव्यलोकान्क्षिपतु हनुमतः पुष्पपुच्छं त्वदीयान् ॥ 94 ॥

धूम्याधूमच्छलोद्यद्बहलतरशितिच्छायशैवालजाल -
च्छन्नाग्निच्छद्मपद्मप्रकटपरिवलन्नाललीलां दधानः।
लङ्कातङ्काय तारापथमभिपततो मारुतेर्बालहस्त -
स्ताद्वस्तापायतापायविनिहतिकृते वत्सराणां सहस्रम् ॥ 95 ॥

वेधा धैर्यं दधातु प्रथयतु पटुतां निर्जरारिप्रमाथी
पृथ्वीं दध्याद्धृतिञ्च प्रमथपतिरसौ मारुतिर्लङ्घतेब्धिम्।
इत्युच्चैरन्तरीक्षे भणितुमिव जवादुत्थितः शृङ्गभागान्
माहेन्द्रादुत्प्लुतस्योदयतु हनुमतो बालहस्तः श्रिये वः ॥ 96 ॥

भूयाद्भूयानभूयांस्त्रिदिवमवतरन्पारदृश्वाम्बुधीनां
लोकालोकावलोकाकलितगुरुमदः सम्मदायाश्रितानाम्।
लाङ्गूलास्फोटशब्दो ज्वरमुपजनयन्यातुधानाग्रियाणां
देवानां कर्णकूपेष्वमृतमवकिरन्नञ्जनानन्दनस्य ॥ 97 ॥

सानन्दं देववृन्दैः समुदथ मुनिभिः किन्नरैरुत्ककर्णं
साक्रन्दं क्रव्यभुग्भिः सरभसमसुरेशाङ्गनाभिः श्रुतास्ते।
भूयासुर्भूयसीनां द्रुतमुपनतये श्रेयसां सन्ततीनां
वायोर्बालस्य वालस्यदविधुतघना बालधिस्फोटशब्दाः ॥ 98 ॥

लङ्कातङ्काय शङ्काकुलदनुजवधू भ्रूणविभ्रंशनार्थं
    दम्भारम्भाय जम्भार्यनुसरणकृतां पुच्छविस्फोटशब्दः।
हन्तानन्ताधिसन्तापितसकलजनानन्दनायोज्जिहानो
    दद्यादद्यानवद्यान्युदयविलसितान्याञ्जनेयस्य तूर्णम् ॥ **99** ॥

दर्पप्राग्भारधुर्यासुरपतिवनिताभ्रूणविभ्रंशदक्षो -
    रक्षोधीशान्दिधक्षोः कपिनिकरपतेर्बृंहितादित्यपक्षः।
दत्तब्रह्मर्षितोषः सकलकलिमलध्वंसनिर्व्यूढरोषो
    लाङ्गूलास्फोटघोषः श्लथयतु विततां कल्मषोत्थां व्यथां वः ॥ **100** ॥

जनङ्गमविगर्हितं गलिततुङ्गशृङ्गावलं
    कुरङ्गमिव सङ्गरे दशमुखं मुहुः खेदयन्।
स्फुलिङ्गपरिलिङ्गितप्रचुररोषपिङ्गाम्बकः
    प्लवङ्गकुलपुङ्गवो दिशतु तेधिकं मङ्गलम् ॥ **101** ॥

पितुरनुकलयञ्श्रीदेवनारायणस्य
    प्रथितमपि च मातुः श्रीलगोविन्ददेव्याः।
गुणगणमिति शिष्यः शास्त्रिगङ्गाधरस्या -
    निलतनुजनुतिं प्राणेष्ट रामावतारः ॥ **102** ॥

॥ इति श्री मारुतिशतकं समाप्तम् ॥